# Shri Ganesha Stuti Vamanakrita

# વામનકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Vamanakrita

File name : gaNeshastutiHvAmanakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM prathamaH khaNDaH | adhyAyaH 46 | 1.46 35-53||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# વામનકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
વામન ઉવાચ ।
નમો વિઘ્નપતે તુભ્યં ભક્તવિઘ્નવિનાશિને ।
અભક્તવિઘ્નદાત્રે ચ ગણેશાય નમો નમઃ ॥ ૩૫॥
વક્રતુણ્ડાય સર્વેશ પાલકાય નમો નમઃ ।
નાનારૂપધરાયૈવ સર્વાન્તર્યામિણે નમઃ ॥ ૩૬॥
સર્વં ચરાચરં સ્વામિંસ્ત્વદાજ્ઞા વશવર્તિ ચ ।
વિભૂતિભિર્મહારાજ કુરુષે સર્વમઞ્જસા ॥ ૩૭॥
બ્રહ્મા પ્રજાપતીનાં ત્વં યજ્ઞાનાં વિષ્ણુરેવ ચ ।
ઈશ્વરાણાં સ્વયં શમ્ભુર્દેવાનાં ત્વં પુરન્દરઃ ॥ ૩૮॥
પ્રકાશાનાં રવિસ્ત્વં ચ ચન્દ્રોઽન્નેષુ ગણાધિપ ।
યમો યમવતાં ત્વં વૈ વરુણો યાદસાં પ્રભો ॥ ૩૯॥
વાયુર્બલવતાં ત્વં ચ નિધીનાં ધનપઃ સ્વયમ્ ।
અગ્નિર્વૈ દાહકાનાં ત્વં રક્ષસાં નિરૃતિઃ સ્વયમ્ ॥ ૪૦॥
નાગાનાં શેષરૂપોઽસિ યોગિનાં શુક્ર એવ ચ ।
કુમારાણાં ત્વં ચ સનત્કુમારોઽસિ ન સંશયઃ ॥ ૪૧॥
ગુહઃ સેનાપતીનાં ત્વં મૃગાણાં સિંહવેષભૃત્ ।
એવં નાનાસ્વરૂપૈસ્ત્વં જગદ્રક્ષણતત્પરઃ ॥ ૪૨॥
ત્વાં સ્તોતું કઃ સમર્થઃ સ્યાદ્યોગરૂપં સનાતનમ્ ।
વેદાઃ શેષશ્ચ વેધા ચ શક્તા ન સ્તવનેઽભવન્ ॥ ૪૩॥
તત્ર મન્દમતિઃ ક્વાહં પારં ગન્તું તવ સ્તુતેઃ ।
તથાપિ ચ યથાબુદ્ધિ સંસ્તુતોઽસિ ચ વિઘ્નપ ॥ ૪૪॥
તવ દર્શનમાત્રેણ કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ।
ધન્યં જન્મ મદીયં વૈ યેન દૃષ્ટો ગજાનનઃ ॥ ૪૫॥
ધન્યૌ માતા પિતા મેઽદ્ય સ્થલં ધન્યં તપોઽપિ ચ ।

ષડક્ષરશ્ચ મન્ત્રોઽયં ધન્યો યેન ત્વમાગતઃ ॥ ૪૬॥
એવમુક્ત્વા નનર્તાઽસૌ ભક્તિભાવપરિપ્લુતઃ ।
રોમાઞ્ચિતશરીરોઽભૂદાનન્દાશ્રુ સૃજન્મુહઃ ॥ ૪૭॥
દેહભાવં પરિત્યજ્ય વામનો હર્ષસંયુતઃ ।
તદેકનિષ્ઠતાં પ્રાપ્તો મહાભાગઃ પ્રજાપતે ॥ ૪૮॥
તં તાદૃશં ગણાધીશો દૃષ્ટ્વા પ્રેમપરિપ્લુતમ્ ।
જગાદ પરમાત્માઽસૌ વામનં ભક્તવત્સલઃ ॥ ૪૯॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
શૃણુ વામન મે વાક્યં વરં વૃણુ હૃદીપ્સિતમ્ ।
તવ ભક્ત્યા તપોયુક્ત્યા સ્તુત્યા વૈ તુષ્ટિમાગતઃ ॥ ૫૦॥
દાસ્યામિ સકલં તુભ્યં યદ્યપિ સ્યાત્ સુદુષ્કરમ્ ।
ધન્યોઽસિ બાલભાવેઽપિ ભક્તિસ્તે મે પરાપદિ ॥ ૫૧॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વદં પ્રભવિષ્યતિ ।
યઃ પઠેચ્છ્રાવયેદ્વાપિ તસ્ય સિદ્ધિર્ભવિષ્યતિ ॥ ૫૨॥
યં યં ચિન્તયતે કામં તં તં દાસ્યામિ દુર્લભમ્ ।
અન્તે મોક્ષં મહાવિષ્ણો સ્વાનન્દે પ્રદદામ્યહમ્ ॥ ૫૩॥

ઇતિ વામનકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પ્રથમઃ ખણ્ડઃ । અધ્યાયઃ ૪૬ । ૧.૪૬ ૩૫-૫૩॥

- .. mudgalapurANaM prathamaH khaNDaH . adhyAyaH 46 . 1.46 35-53..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Vamanakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*